# अथ श्रीमद्गणेश कीलक स्तोत्रम्

श्रीमद् अंकुशधारिणे सद्गुरवे योगीन्द्राय नमः ।। कुट्टनं ।।
दक्ष उवाच ।। गणेश कीलकं ब्रह्मन् वद सर्वार्थ दायकं ।।
मंत्रादीनां विशेषेण सिद्धिदं पूर्णभावतः ।।१।।

श्रीमन्मुद्गल उवाच ।। कीलकेन विहीनाश्च मंत्रा नैव सुखप्रदाः ।।
आदौकीलक मेवं वै पठित्वा जपमाचरेत् ।।२।।

तदा वीर्ययुता मंत्रा नानासिद्धी प्रदायकाः ।।
भवन्ति नात्र सन्देहः कथयामि यथाश्रुतम् ।।३।।

अंगिरसा समादिष्टं मह्यं गुह्यतरं परम् ।।
सिद्धिदं तु गणेशस्य कीलकं शृणु मानद ।।४।।

ऋषिच्छन्दानि न्यासांश्च कुर्यादादौ तथा परान् ।।
एकाक्षरस्य वै दक्ष षडंगाना चरेत् सुधीः ।।५।।

ततो ध्यायेद् गणेशानं ज्योतीरुप घरं परम् ।।
मनोवाणी विहीनंच चतुर्भुज विराजितम् ।।६।।

शुण्डादण्ड मुखं पूर्णं द्रष्टुं नैव प्रशक्यते ।।
विद्याऽविद्या समायुक्तं विभूतिभिरुपासितम् ।।७।।

एवं ध्यात्वा गणेशानं पूजयेन्मानसैः पृथक् ।।
पंचोपचारकैर्दक्ष ततो जपं समाचरेत् ।।८।।

एकविंशति वारं तु जपं कुर्यात् प्रजापते ।।
ततः स्तोत्रं समुच्चार्य पश्चात् सर्वं समाचरेत् ।।९।।

अस्यश्रीमद्गणेश कीलक स्तोत्रमंत्रस्य-
शंभुऋषीः अनुष्टपछंदः गणेशोदेवता जपादौ पाठे विनियोगः

रुपं बलं श्रियं देहि यशोवीर्यं गजानन ।।
मेधां प्रज्ञां तथा कीर्तिं विघ्नराज नमोस्तु ते ।।१।।

यदा देवादयः सर्वे कुंठिता दैत्यपैः कृताः ।।
तदा त्वं तान्निहत्यस्म करोषि वीर्यसंयुतान् ।।२।।

तथा मंत्रा गणेशान कुण्ठिताश्च दुरात्मभिः ।।
शापैश्च तान् सवीर्यान्वै कुरुष्य ते नमोनमः ।।३।।

शक्त्ययः कुंठिताः सर्वाः स्मरणेन त्वया प्रभो ।।
ज्ञानयुक्ताः सवीर्याश्च कृता विघ्नेश ते नमः ।।४।।

चराचरं जगत्सर्व सत्ताहीनं यदाऽ भवत् ।।
त्वया सत्तायुतं ढुण्ढे स्मरणेन कृतं च ते ।।५।।

तत्वानि वीर्यहीनानि यदा जातानि विघ्नप ।।
स्मृत्या ते वीर्य युक्तानि पुनर्जातानि ते नमः ।।६।।

ब्रह्माणि योगहीनानि जातानि स्मरणेन ते ।।
यदा पुनर्गणेशान योगयुक्तानि ते नमः ।।७।।

इत्यादि विविधं सर्व स्मरणेन तव प्रभो ।।
सत्तायुक्तं बभूवैव विघ्नेशाय नमो नमः ।।८।।

तथा मंत्रा गणेशान वीर्य हीना बभूविरे ।।
स्मरणेन पुनर्ढुण्ढे वीर्ययुक्तान् कुरुष्व ते ।।९।।

सर्वं सत्तासमायुक्तं मंत्रपूजादिकं प्रभो ।।
मम नाम्ना भवतु ते वक्रतुण्डाय ते नमः ।।१०।।
उत्कीलय महामंत्रान् जपेन स्तोत्रपाठतः ।।
सर्व सिद्धि प्रदा मंत्रा भवन्तु त्वत्प्रसादतः ।।११।।

गणेशाय नमस्तुभ्यं हेरम्बायैक दन्तिने ।।
स्वानन्दवासिने तुभ्यं ब्रह्मणस्पतये नमः ।।१२।।

(इति) इदं गणेश कीलकं कथितं ते प्रजापते ।।
शिवप्रोक्तं तु मंत्राणा मुत्कीलन करं परम् ।।१३।।

यः पठिष्यति भावेन जपित्वा मंत्रमुत्तमम् ।।
स सर्व सिद्धि माप्नोति नानामंत्र समुभ्द्वाम् ।।१४।।

एनं त्यज्य गणेशस्य मंत्र जपति नित्यदा ।।
स सर्व फल हीनश्च भवति नात्र संशयः ।।१५।।

सर्व सिद्धिकरं प्रोक्तं कीलकं परमाद्भुतं ।।
पुराऽनेन स्वयं शम्भु मंत्रसिद्धिं तु चालभत् ।।१६।।

विष्णु ब्रह्मादयो देवा मुनयो योगिनः परे ।।
अनेन मंत्र सिद्धिं ते लेभिरेच प्रजापते ।।१७।।

ऐलः कीलकमाद्यं वै कृत्वा मंत्रपरायणः ।।
गतः स्वानन्द पुर्यां स भक्तराजो बभूवह ।।१८।।

सस्त्रीको जडदेहेन ब्रह्माण्डमवलोक्य तु ।।
गणेश दर्शनेनैव ज्योतिरुपो बभूवह ।।१९।।

।। इति श्रीमन्मौग्दलोक्तं श्री गणेश कीलक स्तोत्रम् सम्पूर्णम् ।।
।। श्रीमद् गणेशार्पणमस्तु ।।

***